শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ ষট্ত্রিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষটিত্রিংশঃ সর্গঃ ॥

## দেৱৈঃ পার্ৱতীশিৱযোঃ সুরতক্রীডাতো নিৱর্তনমুমাদেৱ্যা দেৱান্ ভূদেৱীং চোদ্দিশ্য শাপদানম্

উক্তৱাক্যে মুনৌ তস্মিন্নুভৌ রাঘৱলক্ষ্মণৌ।
প্রতিনন্দ্য কথাং ৱীরাৱূচতুর্মুনিপুঙ্গৱম্॥ **1.36.1** ॥

ধর্মযুক্তমিদং ব্রহ্মন্ কথিতং পরমং ৎৱযা।
দুহিতুঃ শৈলরাজস্য জ্যেষ্ঠাযা ৱক্তুমর্হসি।
ৱিস্তরং ৱিস্তরজ্ঞোঽসি দিৱ্যমানুষসম্ভৱম্॥ **1.36.2** ॥

ত্রীন্ পথো হেতুনা কেন প্লাৱযেল্লোকপাৱনী।
কথং গঙ্গা ত্রিপথগা ৱিশ্রুতা সরিদুত্তমা॥ **1.36.3** ॥

ত্রিষু লোকেষু ধর্মজ্ঞ কর্মভিঃ কৈঃ সমন্ৱিতা।
তথা ব্রুৱতি কাকুৎস্থে ৱিশ্ৱামিত্রস্তপোধনঃ॥ **1.36.4** ॥

নিখিলেন কথাং সর্ৱামৃষিমধ্যে ন্যৱেদযৎ।
পুরা রাম কৃতোদ্বাহঃ শিতিকণ্ঠো মহাতপাঃ॥ **1.36.5** ॥

দৃষ্টৱা চ ভগৱান্ দেৱীং মৈথুনাযোপচক্রমে।
তস্য সঙ্ক্রীডমানস্য মহাদেৱস্য ধীমতঃ।
শিতিকণ্ঠস্য দেৱস্য দিৱ্যং ৱর্ষশতং গতম্॥ **1.36.6** ॥

ন চাপি তনযো রাম তস্যামাসীৎ পরন্তপ।
সর্ৱে দেৱাঃ সমুদ্যুক্তাঃ পিতামহপুরোগমাঃ ॥ **1.36.7** ॥

যদিহোৎপদ্যতে ভূতং কস্তৎ প্রতিসহিষ্যতি।
অভিগম্য সুরাঃ সর্ৱে প্রণিপত্যেদমব্রুৱন্ ॥ **1.36.8** ॥

দেৱদেৱ মহাদেৱ লোকস্যাস্য হিতে রত।
সুরাণাং প্রণিপাতেন প্রসাদং কর্তুমর্হসি ॥ **1.36.9** ॥

ন লোকা ধারযিষ্যন্তি তৱ তেজঃ সুরোত্তম।
ব্রাহ্মেণ তপসা যুক্তো দেৱ্যা সহ তপশ্চর ॥ **1.36.10** ॥

ত্রৈলোক্যহিতকামার্থং তেজস্তেজসি ধারয।
রক্ষ সর্ৱানিমাল্লোকান্ নালোকং কর্তুমর্হসি ॥ **1.36.11** ॥

দেৱতানাং ৱচঃ শ্রুৎৱা সর্ৱলোকমহেশ্ৱরঃ।
বাঢমিত্যব্রৱীৎ সর্ৱান্ পুনশ্চেদমুৱাচ হ ॥ **1.36.12** ॥

ধারযিষ্যাম্যহং তেজস্তেজসৈৱ সহোমযা।
ত্রিদশাঃ পৃথিৱী চৈৱ নির্ৱাণমধিগচ্ছতু ॥ **1.36.13** ॥

যদিদং ক্ষুভিতং স্থানান্মম তেজো হ্যনুত্তমম্।
ধারযিষ্যতি কস্তন্মে ব্রুৱন্তু সুরসত্তমাঃ ॥ **1.36.14** ॥

এৱমুক্তাস্ততো দেৱাঃ প্রত্যূচুর্ৱৃষভধ্ৱজম্।
যত্তেজঃ ক্ষুভিতং হ্যদ্য তদ্ধরা ধারযিষ্যতি ॥ **1.36.15** ॥

এৱমুক্তঃ সুরপতিঃ প্রমুমোচ মহাবলঃ।
তেজসা পৃথিৱী যেন ৱ্যাপ্তা সগিরিকাননা ॥ **1.36.16** ॥

ততো দেৱাঃ পুনরিদমূচুশ্চাপি হুতাশনম্।
আৱিশ ৎৱং মহাতেজো রৌদ্রং ৱাযুসমন্ৱিতঃ ॥ **1.36.17** ॥

তদগ্নিনা পুনর্ব্ব্যাপ্তং সঞ্জাতং শ্বেতপর্ব্বতম্।
দিব্যং শরবণং চৈব পাবকাদিত্যসন্নিভম্॥ **1.36.18** ॥

যত্র জাতো মহাতেজাঃ কার্তিকেযোঽগ্নিসম্ভবঃ।
অথোমাং চ শিবং চৈব দেবাঃ সর্ষিগণাস্তথা॥ **1.36.19** ॥

পূজযামাসুরত্যর্থং সুপ্রীতমনসস্তদা।
অথ শৈলসুতা রাম ত্রিদশানিদমব্রবীৎ॥ **1.36.20** ॥

সমন্যুরশপৎ সর্বান্ ক্রোধসংরক্তলোচনা।
যস্মান্নিবারিতা, চাহং সঙ্গতা পুত্রকাম্যযা॥ **1.36.21** ॥

অপত্যং স্বেষু দারেষু নোৎপাদযিতুমর্হথ।
অদ্যপ্রভৃতি যুষ্মাকমপ্রজাঃ সন্তু পত্নযঃ॥ **1.36.22** ॥

এবমুক্ত্বা সুরান্ সর্বাঞ্শশাপ পৃথিবীমপি।
অবনে নৈকরূপা ৎবং বহুভার্যা ভবিষ্যসি॥ **1.36.23** ॥

ন চ পুত্রকৃতাং প্রীতিং মৎক্রোধকলুষীকৃতা।
প্রাপ্স্যসি ৎবং সুদুর্মেধো মম পুত্রমনিচ্ছতী॥ **1.36.24** ॥

তান্ সর্বান্ পীডিতান্ দৃষ্টবা সুরান্ সুরপতিস্তদা।
গমনাযোপচক্রাম দিশং বরুণপালিতাম্॥ **1.36.25** ॥

স গৎবা তপ আতিষ্ঠৎ পার্শ্বে তস্যোত্তরে গিরেঃ।
হিমবৎপ্রভবে শৃতে সহ দেব্যা মহেশ্বরঃ॥ **1.36.26** ॥

এষ তে বিস্তরো রাম শৈলপুত্র্যা নিবেদিতঃ।
গঙ্গাযাঃ প্রভবং চৈব শৃণু মে সহলক্ষ্মণ॥ **1.36.27** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে বাল্মীকীযে আদিকাব্যে বালকাণ্ডে ষটিত্রিংশঃ সর্গঃ ॥